# माहेश्वराणि सूत्राणि

ये माहेश्वरसूत्राणां प्रसङ्गं न जानन्ति, सर्वप्रथमं भीतिः मास्तु ! अस्मिन् सारल्यम् अस्ति, अपि च सौन्दर्यम् | अधुना यत् अधः लिखितम् अस्ति तत् पठित्वा यावत् शक्यम् अवगच्छन्तु; अग्रे गत्वा पाठेषु एषां सूत्राणां महत्त्वं प्रकटं भविष्यति | इमानि चतुर्दश माहेश्वराणि सूत्राणि—

अ इ उण् | ऋ लृक् | ए ओङ् | ऐ औच् | ह य व रट् | लण् | ञ म ङ ण नम् | झ भञ् | घ ढ धष् | ज ब ग ड दश् | ख फ छ ठ थ च ट तव् | क पय् | श ष सर् | हल् |

उपरि चतुर्दश "वाक्यानि" लिखितानि; प्रत्येकं वाक्यम् एकं सूत्रम् |

सर्वे वर्णमालां जानीयुः | अत्र वर्णमालायाः नूतनम् आयोजनम् इति चिन्तयन्तु | आयोजनस्य आधारः **प्रत्याहारः** |

**प्रत्याहारः** इत्युक्तौ वर्णानां समूहः | प्रत्येकं प्रत्याहारस्य अन्ते इत्–संज्ञक–वर्णः स्थितः | अयम् इत्–संज्ञक–वर्णः प्रत्याहारस्य सीमारेखा भवति | प्रत्याहारः नाम सङ्ग्रहः; अस्मिन् सङ्ग्रहे इत्–संज्ञकाः वर्णाः नान्तर्भूताः इति अवधेयम् | ते केवलं प्रत्याहारस्य सीमां कुर्वन्ति | तदा अपगच्छन्ति |

यथा—

अण् = अ, इ, उ
ऋक् = ऋ, लृ
अक् = अ, इ, उ, ऋ, लृ
एङ् = ए, ओ
एच् = ए, ओ, ऐ, औ
झष् = झ, भ, घ, ढ, ध
जश् = ज, ब, ग, ड, द
अच् = अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ (सर्वे स्वराः)
हल् = सर्वाणि व्यञ्जनानि
अल् = सर्वे वर्णाः (सर्वे स्वराः + सर्वाणि व्यञ्जनानि)

अवधेयम्—
१. स्वराः
अ, इ, उ, ऋ = एषु प्रत्येकम् अष्टादशानां वर्णानां प्रतिनिधिः (ह्रस्वः, दीर्घः, प्लुतः; उदात्तः, अनुदात्तः, स्वरितः; अनुनासिकः, अननुनासिकः च | 3 x 3 x 2 = 18 |) यथा अनुनासिक–उदात्त–ह्रस्व–अकारः, अननुनासिक–उदात्त–ह्रस्व–इकारः, अनुनासिक–अनुदात्त–ह्रस्व–उकारः, अननुनासिक–अनुदात्त–ह्रस्व–ऋकारः; तदा पुनः अनुनासिक–स्वरित–ह्रस्व–अकारः, इत्यादीनि रूपाणि |
लृ = अयं द्वादशानां प्रतिनिधिः (यतः अस्य वर्णस्य दीर्घरूपं नास्ति | 2 x 3 x 2 = 12 |)
ए, ओ, ऐ, औ = एषु प्रत्येकम् द्वादशानां वर्णानां प्रतिनिधिः (यतः एषां ह्रस्वरूपं नास्ति | 2 x 3 x 2 = 12 |)

२. व्यञ्जनानि

उच्चारणार्थं सर्वेषु एव हल्–वर्णेषु अकारः योजितः वर्तते | माहेश्वरसूत्रेषु वस्तुतः "य" इत्युक्ते "य्", "ब" इत्युक्ते "ब्", एवं च सर्वे हल्–वर्णाः तथा |

अभ्यासः

अस्माकं सर्वेषां कृते अस्मिन् विषये अभ्यासः अपेक्षितः | यतोहि माहेश्वराणि सूत्राणि च प्रमुखाः प्रत्याहाराश्च मनसि सन्ति चेत् महान् लाभः | किन्तु कथं साधनीयम् ? तदर्थम् अस्माकं चित्रा–भगिन्या निर्मितम् एकं सुन्दरयन्त्रं येन प्रत्याहाराः आनन्देन अध्येतुं शक्याः | सर्वे अवश्यं गत्वा अवलोकयन्तु –– अन्तर्जाले स्थलम् अत्रास्ति | बालकानां कृते निर्मितवती, किन्तु अस्माकं कृतेऽपि नितरां व्यावहारिकम् ! तत्र flash cards, क्रीडाः, परीक्षा इत्यादिकं लभ्यन्ते |

Swarup – June 2013